प्रश्नः – अधस्थितस्य श्लोकस्य प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्यानं कुरुत।

उत्तरम् –

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।

मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ (गीता – ३.४२)

श्लोकोऽयं वेदव्यासविरचितायाः श्रीमद्भगवद्गीतायाः तृतीयाध्यायात् कर्मयोगात् समुपलभ्यते।

भगवतः भक्तवरः श्रीअर्जुनः यदा भगवन्तं श्रीकृष्णं पृच्छति यत्, मानवः अनिच्छन् अपि बलाद् केन नियुक्तः सन् पापकर्मसु लिप्यते इति। तदा भक्तप्रवरस्य धनुर्धरस्य अर्जुनस्य जिज्ञासां समाधत्तुमाह भगवान् इन्द्रियाणि पराणीति।

स्थूलदेहात् इन्द्रियाणि नेत्रादीनि पराणि श्रेष्ठाणि इति आहुः कथयन्ति पण्डिताः, इन्द्रियेभ्यः तेभ्यः नेत्रादिभ्यः मनः अन्तरिन्द्रियम् परम् श्रेष्ठम्, मनसः तस्मात् अन्तरिन्द्रियात् तु किन्तु बुद्धिः परा श्रेष्ठा तु परन्तु यः पुरुषः बुद्धेःबुद्धितः परतः ऊर्ध्वस्थः उपरि वर्तमानः सः एषः आत्मा इति सान्वयप्रतिपदार्थाः।

इन्द्रियमनोबुद्धीनाम् अधिष्ठाता काम एव मानवं बलात् पापकर्मसु नियोजयति। तस्य फलं खलु एषः कामः आत्मनः ज्ञानं विज्ञानं च नाशयति। किञ्च ज्ञानम् आवृत्य तं मोहयति। तर्हि मानवस्य किं कर्तव्यम् इति चेत् साक्षात् भगवान् कथयति यत्, इन्द्रियमनोबुद्धिभ्यः परतमम् उत्कृष्टतमम् वा आत्मानं विदित्वा कामस्य विजयार्थं प्रयत्नः कर्तव्यः। स्थूलदेहात् इन्द्रियाणि चक्षुकर्णनासिकारसनात्वक् इति पञ्च उत्कृष्टानि भवन्ति। पुनश्च इन्द्रियेभ्यः संकल्पविकल्पात्मकं मनः खलु श्रेष्ठम्। पुनश्च मनसः उपरि विराजते निश्चयात्मिका बुद्धिः। का कथा, बुद्धेरपि ऊर्ध्वं वर्तते आत्मा। तस्य आत्मनः सर्वातिशायित्वं सर्वश्रेष्ठत्वं च सततं स्मर्तव्यं मनुजनुभिः। संस्कृतेन हि मनसा इन्द्रियाणि सम्यक् नियम्य बुद्धेरपि परतः विद्यमानम् आत्मानं विज्ञाय समाधिद्वारैव कामादीनां षड्रिपूणां विजयः कर्तव्यः इति भगवत उपदेशामृतमिति शिवम्॥